अपरञ्च तत्रैव । ३ । ८४ । ४० ।
"ब्रह्मावर्त्तं ततो गच्छेत् ब्रह्मचारी समाहितः ।
अश्वमेधमवाप्नोति सोमलोकञ्च गच्छति ॥")

ब्रह्मासनं, क्ली, (ब्रह्मणे ब्रह्मप्राप्तये आसनम् ।) ध्यानासनम् । योगासनम् । इत्यमरः । २।७।४०॥ ध्यानं परमार्थचिन्तनम् । योगश्चित्तवृत्तिनिरोधमात्रम् । ध्यानं निराकारभावनम् । योगः साकारभावनमिति वा । तयोः पद्मस्वस्तिकाद्यासनं यत् तत्र ब्रह्मासनं स्यात् । इति भरतः ॥ (आसनविशेषः । तल्लक्षणं यथा,—
"ब्रह्मासनं तदा वक्ष्ये यत्कृत्वा ब्राह्मणो भवेत् ।
एकपादसुरौ दत्त्वा तिष्ठेद्दण्डाकृतिर्भवेत् ॥"
ब्रह्मणा आसनमिति विग्रहे ब्रह्मासनम् ॥)

ब्रह्मास्त्रं, क्ली, (ब्रह्मस्वरूपमस्त्रम् ।) ब्रह्मस्वरूपास्त्रम् । यथा, देवीपुराणे ।
"तदा रामेण क्रुद्धेन ब्रह्मास्त्रं प्रति रावणे ।
नारायणविघातार्थं चिन्तितं चतुराननम् ॥
सुक्ष्ममेखलदण्डाक्षस्रुवदर्भकृताजिनम् ।
हुङ्काररावबहुलमागत्य पुरतः स्थितम् ॥"

ब्रह्मिष्ठा, स्त्री, (अतिशयेन ब्रह्म । ब्रह्म + इष्ठन् + टाप् च ।) दुर्गा । यथा,—
"ब्रह्मिष्ठा वेदमातृत्वात् गायत्री चरणाग्रजा ।
वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी ॥"
इति देवीपुराणे ४५ अध्यायः ॥

ब्रह्मी, स्त्री, (मेधाजनकत्वात् ब्रह्मणे हिता । ब्रह्म + अण् । बाहुलकात् न वृद्धिः । ततो ङीप् ।) पङ्कगड़कमत्स्यः । इति त्रिकाण्डशेषः ॥ पाँकाल इति भाषा । पङ्क्तिकाह्वश्च । शाकभेदः । ब्रमी इति भाषा । इति मेदिनी । मे, १६ ॥ ब्रह्मीशाकस्य पर्य्यायः । मत्स्याक्षी २ सुरसा ३ वयस्था ४ ब्रह्मचारिणी ५ । इति रत्नमाला ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठरोगचिकित्सायाम् ।
"तैलतुल्यं प्रदातव्यं स्वरसञ्च पृथक् पृथक् ।
महाकालवचाब्रह्मी तुम्बाग्निगृहपुत्रिका ॥")
अस्या गुणाः । भेदकत्वम् । स्वरकारित्वम् । पित्तकफनाशित्वञ्च । इति राजवल्लभः ॥ अस्याः पर्य्यायान्तरं गुणाश्च ब्राह्मीशब्दे द्रष्टव्याः ॥

ब्रह्मीघृतं, क्ली, (ब्रह्मीजातं घृतम् ।) औषधविशेषः । सारस्वतघृतमिति ख्यातम् । यथा,—
"समूलपत्रामुत्पाट्य ब्रह्मीं प्रक्षाल्य वारिणा ।
उदूखले क्षोदयित्वा [illegible] वस्त्रेण गालयेत् ॥
रसं चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत् ।
हरिद्रा मालती कुष्ठं त्रिवृता सहरीतकी ।
एतेषां पलिकैर्भागैः शेषास्तु कार्षिकाः स्मृताः ॥
पिप्पल्योऽथ विड़ङ्गानि सैन्धवं शर्करा वचा ।
सर्व्वमेतत् समालोड्य शनैर्मृद्वग्निना पचेत् ॥
एतत्प्राशितमात्रेण वाग्विशुद्धिः प्रजायते ।
सप्तरात्रप्रयोगेण किन्नरैः सह गीयते ॥
अर्द्धमासप्रयोगेण स्वरो भवति कौकिलः ।
मासमेकं प्रयोगेण भवेत् श्रुतिधरो नरः ॥
पञ्च गुल्मान् प्रमेहांश्च कासं पञ्चविधं जयेत् ।
वन्ध्यानाञ्चैव नारीणां नराणामल्परेतसाम् ।
घृतं सारस्वतं नाम बलवर्णवपुःप्रदम् ॥"
इति जयनारायणकृतचिकित्सारत्नसंग्रहः ॥
(अपरञ्च ।
"ब्रह्मीरसे वचाकुष्ठशङ्खपुष्पीभिरेव च ।
पुराणं मेध्यमुन्मादग्रहापस्मारनाशनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽपस्माराधिकारे ॥)

ब्रह्मोतं, त्रि, ब्रह्मणि आ सम्यक् प्रकारेण ऊतं ग्रथितम् । ("लोपोऽस्योमाङोः ।" इति सूत्रेण अकार लोपः ।) इति मुग्धबोधव्याकरणम् ॥

ब्रह्मोत्तरं, त्रि, ब्रह्मा ब्राह्मणः उत्तरः प्रधानं यस्य । ब्राह्मणस्वामिकभूम्यादि । इति व्यवहार प्रसिद्धम् ॥ (देशभेदः । इति मात्स्यम् । १२० । ५० ॥)

ब्रह्मोद्यं, क्ली, (ब्रह्मणो वेदस्य वदनम् । ब्रह्म + वद् + क्यप् ।) ब्रह्मणो वाक्यम् । इति मुग्धबोधव्याकरणम् ॥

ब्रह्मोद्या, त्रि, (ब्रह्म + वद् + क्यप् + टाप् ।) ब्रह्मणः कथा । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । २ । २३१ ।
"ब्रह्मोद्याश्च कथाः कुर्य्यात् पितॄणामेतदीप्सितम् ॥"
"परमात्मनिरूपणपराः कथाश्च कुर्य्यात् ।"
इति तट्टीकायां कुल्लूकभट्टः ॥)

ब्रह्मोपनेता, [ऋ] पुं, (ब्रह्माणं ब्राह्मणं उपनयति इति । ब्रह्म + उप + णी + तृच् । उपनयनहेतुकदण्डत्वात्तथात्वम् ।) पलाशवृक्षः । इति राजनिर्घण्टः ॥ ब्राह्मणोपनयनकर्त्ता च ॥

ब्रह्मौदनं, क्ली, (ब्रह्मणे देयमोदनम् ।) यज्ञे ऋत्विग्भ्यो दत्तमन्नम् । इति वैदिकाः । (यथा, अथर्व्ववेदे । ४ । ३५ । ७ ।
"ब्रह्मौदनं विश्वजितं पचामि शृण्वन्तु मे श्रद्दधानस्य देवाः ॥")

ब्राह्मं, क्ली, (ब्रह्मण इदम् । ब्रह्मन् + "तस्येदम् ।" ४।३।१२० । इत्यण् । 'नस्तद्धिते ।' ६।४।१४४ । इति टिलोपः ।) ब्रह्मतीर्थं । तत्तु अङ्गुष्ठस्य मूले वर्त्तते । इत्यमरः ॥ २ । ७ । ५१ ॥ अनेन तीर्थेन द्विजस्याचमनं यथा, आह्निकतत्त्वे ।
"अन्तर्जानुशुचौ देश उपविष्ट उदङ्मुखः ।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥
अङ्गुष्ठोत्तरतो रेखा या पाणेर्दक्षिणस्य च ।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥"
ब्रह्मपुराणम् । यथा,—
"ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ॥"
इति मलमासतत्त्वधृतविष्णुपुराणवचनम् ॥
(ब्रह्मसम्बन्धिनि, त्रि । यथा, मनुः । १ । ६८ ।
"ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः ।
एकैकशो युगानान्तु क्रमशस्तन्निबोधत ॥"
ब्रह्मा देवतास्य इति । ब्रह्मन् + "सास्य देवता ।" ४ । २ । २४ । इत्यण् । टिलोपः । ब्रह्मदेवताकमस्त्रादि । यथा, रघुः । १२ । ९७ ।
"अमोघं सन्दधे चास्मै धनुष्येकधनुर्द्धरः ।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ॥")

ब्राह्मः, पुं, (ब्रह्मणोऽपत्यं पुमान् इति । ब्रह्मन् + "तस्यापत्यम् । ४ । १ । ९२ । इत्यण् । "नस्तद्धिते ।" ६ । ४ । १४४ । इति टिलोपः ।) नारदः । इति जटाधरः ॥ (ब्रह्मण इवायमिति अण् ।) विवाहविशेषः । यथा,—
"वरमाहूय यथाशक्त्यलङ्कृता कन्या यत्र दीयते सः ।"
यथा,—
"आच्छाद्य चार्च्चयित्वा च श्रुतशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्म्मः प्रकीर्त्तितः ॥"
इत्युद्वाहतत्त्वम् ॥
("रात्रेश्च पश्चिमे यामे मुहूर्त्तो ब्राह्म उच्यते ।"
इति नियमात् रात्रिशेषयामार्द्धस्थितोऽरुणोदयात् प्राक्दण्डद्वयात्मको कालविशेषः । यथा, मनुः । ४ । ९१ ।
"ब्राह्मे मुहूर्त्ते बुद्ध्येत धर्म्मार्थौ चानुचिन्तयेत् ॥")

ब्राह्मणं, क्ली, (ब्रह्मन् + अण् न टिलोपः ।) ब्रह्मसंघातः । ब्राह्मणसमूहः । वेदभागः । इति मेदिनी । ने, ६७ ॥

ब्राह्मणः, पुं, ब्राह्मणो विप्रस्य प्रजापतेर्वा अपत्यम् । ब्रह्म वेदस्तमधीते वा सः । इति भरतः ॥ (ब्रह्मन् + अण् "ब्राह्मोऽजातौ ।" ६ । ४ । १७१ । इति नटिलोपः ।) तत्पर्य्यायः । द्विजातिः २ अग्रजन्मा ३ भूदेवः ४ बाड़वः ५ विप्रः ६ । इत्यमरः ॥ २ । ७ । ४ । ॥ द्विजः ७ सूत्रकण्ठः ८ ज्येष्ठवर्णः ९ अग्रजातकः १० द्विजन्मा ११ वक्त्रजः १२ मैत्रः १३ वेदवासः १४ नयः १५ गुरुः १६ । इति शब्दरत्नावली ॥ ब्रह्मा १७ षट्कर्म्मा १८ द्विजोत्तमः १९ । इति राजनिर्घण्टः ॥ ॥ अयं सर्व्ववर्णश्रेष्ठः । ब्रह्मणो मुखाज्जातः । प्लक्षद्वीपे तस्य संज्ञा हंसः । शाल्मलद्वीपे श्रुतिधरः । कुशद्वीपे कुशलः । क्रौञ्चद्वीपे गुरुः । शाकद्वीपे ऋतव्रतः । पुष्करद्वीपे सर्व्वे एकवर्णाः । अस्य शास्त्रनिरूपितधर्म्मास्त्रयः अध्ययनं यजनं दानञ्च । जीविकास्त्रिसः अध्यापनं याजनं प्रतिग्रहश्च । अयमाश्रमचतुष्टयवान् भवति । यथा । ब्रह्मचारी गृहस्थः वानप्रस्थः सन्न्यासी च । क्षत्रियवैश्ययोस्तु क्रमश एकैकपादहीनत्वमिति बोध्यम् । इति श्रीभागवतम् ॥ ॥ ब्राह्मणीक्षत्त्रियावैश्यासु ब्राह्मणाज्जातो ब्राह्मणः । यथा,—
"ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः ।
क्षत्त्रियायां तथैव स्याद्वैश्यायामपि चैव हि ॥"
इति महाभारते अनुशासने । ४७ । २८ ॥
तस्य लक्षणं यथा,—
"जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यस्तिष्ठेन्नित्यं स द्विज उच्यते ॥"
इति वह्निपुराणम् ॥
अपि च ।
"न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः ।
सर्व्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः ।